শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮৯

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৮৯

*ৱৃকাসুরৱধৱর্ণনম্*

রমাজানে জানে যদিহ তৱ ভক্তেষু ৱিভৱো
  ন সদ্যসসম্পদ্যস্তদিহ মদকৃত্ত্বাদশমিনাম্।
প্ৰশান্তিং কৃত্বৈৱ প্ৰদিশসি ততঃ কামমখিলং
  প্ৰশান্তেষু ক্ষিপ্ৰং ন খলু ভৱদীযে চ্যুতিকথা॥ ১ ॥

সদ্যঃ প্ৰসাদরুষিতান্ ৱিধিশঙ্করাদীন
  কেচিদ্বিভো নিজগুণানুগুণং ভজন্তঃ।
ভ্ৰষ্টা ভৱন্তি বত কষ্টমদীর্ঘদৃষ্ট্যা
  স্পষ্টং ৱৃকাসুর উদাহরণং কিলাস্মিন্॥ ২ ॥

শকুনিজঃ স তু নারদমেকদা
  ত্বরিততোষমপৃচ্ছদধীশ্বরম্।
স চ দিদেশ গিরীশমুপাসিতুং
  ন তু ভৱন্তমবন্ধুমসাধুষু॥ ৩ ॥

তপস্তপ্ত্বা ঘোরং স খলু কুপিতঃ সপ্তমদিনে
  শিরঃ ছিত্বা সদ্যঃ পুরহরমুপস্থাপ্য পুরতঃ।
অতিক্ষুদ্ৰং রৌদ্ৰং শিরসি করদানেন নিধনং
  জগন্নাথাদ্বৱ্ৰে ভৱতি ৱিমুখানাং ক্ব শুভধীঃ॥ ৪ ॥

মোক্তারং বন্ধমুক্তো হরিণপতিরিৱ প্ৰাদ্ৰৱতসোথ রুদ্ৰং
  দৈত্যাদ্ভীত্যা স্ম দেৱো দিশি দিশি ৱলতে পৃষ্ঠতো দত্তদৃষ্টিঃ।
তূষ্ণীকে সর্ৱলোকে তৱ পদমধিরোক্ষ্যন্তমুদ্বীক্ষ্য শর্ৱং
  দূরাদেৱাগ্ৰতস্ত্বং পটুৱটুৱপুষা তস্থিষে দানৱায॥ ৫ ॥

www.prapatti.com

ভদ্রং তে শাকুনেয ভ্রমসি কিমধুনা ত্বং পিশাচস্য ৰাচা
সন্দেহশ্চেন্মদুক্তৌ তৱ কিমু ন করোষ্যঙ্গুলীমঙ্গ মৌলৌ।
ইত্থং ত্বদ্বাক্যমূঢঃ শিরসি কৃতকরঃ সোপতচ্ছিন্নপাতং
ভ্রংশো হ্যেৱং পরোপাসিতুরপি চ গতিঃ শূলিনোপি ত্বমেৱ॥ ৬ ॥

ভৃগুং কিল সরস্বতীনিকটৱাসিনস্তাপসা-
স্ত্রিমূর্তিষু সমাদিশন্নধিকসত্ত্বতাং ৱেদিতুম্।
অযং পুনরনাদরাদুদিতরুদ্ধরোষে ৱিধৌ
হরেপি চ জিহিংসিষৌ গিরিজযা ধৃতে ত্বামগাত্॥ ৭ ॥

সুপ্তং রমাঙ্কভুৱি পঙ্কজলোচনং ত্বাং
ৱিপ্রে ৱিনিঘ্নতি পদেন মুদোত্থিতস্ত্বম্।
সর্ৱং ক্ষমস্ব মুনিৱর্য ভৱেত্ সদা মে
ত্বত্পাদচিহ্নমিহ ভূষণমিত্যৱাদীঃ॥ ৮ ॥

নিশ্চিত্য তে চ সুদৃঢং ত্বযি বদ্ধভাৱাঃ
সারস্বতা মুনিৱরা দধিরে ৱিমোক্ষম্।
ত্বামেৱমচ্যুত পুনশ্চ্যুতিদোষহীনং
সত্ত্বোচ্চযৈকতনুমেৱ ৱযং ভজামঃ॥ ৯ ॥

জগত্সৃষ্ট্যাদৌ ত্বাং নিগমনিৱহৈৱন্দিভিরিৱ
স্তুতং ৱিষ্ণো সচ্চিত্পরমরসনির্দ্বৈতৱপুষম্।
পরাত্মানং ভূমন্ পশুপৱনিতাভাগ্যনিৱহং
পরীতাপশ্রান্ত্যৈ পৱনপুরৱাসিন্ পরিভজে॥ ১০ ॥

**********

www.prapatti.com